तुग्रस्य सूनुं भुज्युं भुज्युनामकं समुद्रमध्ये भग्ननावम्”भा०

**तुग्र्या** स्त्री तुज–रक् न्यङ्क्वा० कुः स्वार्थे यत्। १जले निघण्टुः। “आवः शमं वृषभं तुग्र्यासु” ऋ० १।३३।१५। “तुग्र्यासु जलेषु”भा०। निघण्टौ बुसं तुग्र्यमिति पाठान्तरात्। जले न०। तदनुसारेण “पिब स्वधैनवानामुत यस्तुग्र्ये सचा”८।२२।२०। बुसं तुग्र्यमित्युदकनामसु पाठात्”भा०। वस्तुतस्तु निघण्टौ बुसं तुग्र्यं तुग्र्यावर्वरमित्येव पाठः मुद्रितपुस्तके तुग्र्यमिति पतितम्। तुग्रस्य राजर्षेरपत्यं बा० यत्। तुग्रपुत्रे भुज्यौ पु०। “अस्तं वयो न तुग्र्यम्”ऋ० ८।३।२२ “तुग्र्यं तुग्रपुत्रम्”भा०।

**तुग्वन्** त्रि० तुज-बा० कनिप् न्यङ्क्वा० जस्य गः। १हिंसके। “सुषास्त्वा अधि तुग्वनि” ऋ० ८।१९।३७।

**तुङ्ग** पु०तुजि–हिंसायां घञ् न्यङ्क्वा०कुः।१पुन्नागवृक्षे २पर्वते ३बुधग्रहे हेमच०।४नारिकेले ५गण्डके राजनि०। ६उच्चे त्रि०। ७ग्रहविशेषस्य राशिभेदे पु०। उच्चशब्दे १५८पृ० दृश्यम् “अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः”। “सूर्य्याद्युच्चान् क्रियवृषमृगस्त्रीकुलीरान्त्ययूके दिग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशांश्च विंशान्। अंशानेतान् वदति यवनस्तान्य तुङ्गांस्तुतुङ्गांस्तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचानिति”।

तुङ्गस्थग्रहभेदफलम् “तुङ्गेऽर्कः शुभसंयुतः शुभकरैर्मित्रैश्च दृष्टो यदा दैवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा त्रिकम्। वित्तेशः प्रथितो विमर्द्दितरिपुः क्षौणीशमान्योऽथवा क्ष्मापालार्च्चितपादपद्मयुगलो राजा त्रिकोणे यदा”। र०। “तुङ्गे चन्द्रमसि प्रसन्नवपुषि त्वह्लादनष्टद्युतौ प्रख्यातोऽरिविमर्दकोऽगदतनू राजेश्वरो रूपवान्। क्ष्मापालार्च्चितपादपद्मयुगलो वा धर्म्मशीलो महान् सौम्यैरेव युतोऽथ वा प्रियतमैर्दृष्टे त्रिकोणेऽपि च”। च०। “यदि भवति मृगस्थो भूमिपुत्रस्तदा वै न दिनकरमयूखाद्भ्रष्टरश्मिर्नरेन्द्रः। अगदतनुरभीतः शत्रुदर्पापहारी प्रणतरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः”। म०। “कन्यास्थः शशलाञ्छनस्य तनयस्तिथ्यंशकैः संयुतो दृष्टो वा यदि संयुतः शुभकरैर्ज्जातस्तदा भूपतिः। यात्रायां तुरगोष्ट्रमत्तकरिणां यानैर्मही कम्पते स क्ष्माभृद्वरणीरुहाविगलिता यान्ति त्रिकोणेऽपि च”। बु०। “तुङ्गे गुरौ मित्रखगेन दृष्टो राजा भवेदिन्द्रसमानमूर्त्तिः। गजाश्वनौकार्णवपूर्णलक्ष्मीः पृथ्वीपतिः स्वस्य त्रिकोणगोऽपि”। वृ०। “तुङ्गे भृगौ शुभसुहृत्प्रयुते च दृष्टे दैवात् पुनः स यदि पश्यति मित्रसंघान्। भूपाधिपो भवति कीर्त्तिकरः प्रधानो दीर्घायुरग्रसुखभुग् भृगुजे त्रिकोणे”। शु०। “तुङ्गे शनौ मित्रखगेन दृष्टे प्रचण्डदण्डो नृपतिप्रधानः। न दृश्यते दिग्गमने च गुर्वी त्रिकोणगे चापि नरेन्द्रमूर्त्तिः”। श०। “भवति धरणीपालो नीचबुद्धिः प्रतापी हयगजधनपूर्णो जातिवर्गे विरक्तः। कुटिलमतिरनीतो भूरिभाण्डारयुक्तस्तमसि मिथुनसंस्थे जायते मानवेन्द्रः”। रा०। “मृगपतिवृषकन्याकर्कटस्थे च राहौ भवति विपुललक्ष्मी राजराजाधिपो वा। हयगजनरनौकामण्डितः सार्वभौमो नृपतिरमरपूज्यो राहुतुङ्गी चिरायुः”। रा०। “अरिनिधनव्ययतुङ्गे कीर्त्तितमेतत्फलं व्यर्थं केन्द्रे त्रिकोणे लाभे वा तुङ्गफलं यथोद्दिष्टम्” इति कोष्ठीप्र०।८किञ्जल्के न०शब्दार्थचि०। १०उग्रे ११प्रधाने १२उन्नते त्रि० शब्दर०। “तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता”माघः।१३शिवे पु०तुङ्गबीजशब्दे दृश्यम्।

**तुङ्गक** पु० तुङ्ग+स्वार्थे क संज्ञायां कन् वा। १पुन्नागवृक्षे शब्दरत्ना० २तुङ्गजशब्दार्थे ३अरण्यरूपे तीर्थभेदे न०। “तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः। वेदानध्यापयत्तत्र ऋषिः सारस्वतः पुरा। तत्र वेदेषु नष्टेषु मुनेरङ्गिरसः सुतः। ऋषीणामुत्तरीयेषु सूपविष्टो यथासुखम्। ओङ्कारेण यथान्यायं सम्यगुच्चारितेन ह। येन यत्पूर्वमभ्यस्तं तत्सर्वं समुपस्थितम्। ऋषयस्तत्र देवाश्च वरुणोऽग्निः प्रजापतिः। हरिर्नारायणस्तत्र महादेवस्तथैव च। पितामहश्च भगवान् देवैः सह महाद्युतिः। भृगुं नियोजयामास याजनार्थं महाद्युतिम्। ततः स चक्रे भगवान् ऋषीणां विधिवत्तदा। सर्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा। आज्यभागेन तत्राग्निं तर्पयित्वा यथाविधि। देवाः स्वभवनं याता ऋषयश्च यथागतम्। तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम!। पापं प्रणश्यत्यखिलं स्त्रिया वा पुरुषस्य वा” भा० व० ८५ अ०। तत्कथा दृश्या

**तुङ्गकूट** पु० तुङ्गं कूटमस्य। उच्चशृङ्गे पर्वतभेदे।

**तुङ्गनाभ** पु० तुङ्गो नाभिरस्य। कीटभेदे। तुङ्गीनासशब्दे दृश्यम्। [ दृश्यम्। तुङ्गराश्यादयोऽप्यत्र।

**तुङ्गभ** न० कर्म्म०। सूर्य्यादीनामुच्चराशौ मेषादौ तुङ्गशब्दे